**International Journal of Research in Social Sciences**
Vol. 8 Issue 4, April 2018
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# तात्पर्यलिङ्गेषु उपपत्ति:

डॉ सत्यव्रत मिश्रः सहकारी शिक्षकः
बलाङ्गीरम्, ओाडिशा अनुसन्धाता(भू.पू)अद्वैतवेदान्ताविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः तिरुपतिः

यथा जीवब्रह्मैक्ये उपपत्ति: न प्रदश्येत यदि तदा तद्बोधकवेदान्तभागस्य प्रत्यक्षादिविरोधेन प्रामाण्यम् एव नास्तीति शङ्कका उदियात्। तस्या: वारणार्थम् अवश्यमेव उपपत्ति: दर्शनीया। अत एच श्रुत्या – सूत्रजातेन भाष्यग्रन्थेन च तत्र तत्र उपपत्तिविशेषा: अस्मिन् विषये प्रदर्श्यन्ते। गौडापादाचार्यै: च आत्मैकत्वप्रतिपत्यर्थं द्वैतस्य सर्वस्यापि कल्पितत्वं बोधयितुम् उपपत्तिप्रधानम् एकं प्रकरणमेव स्वीये माण्डुक्यकारिकाग्रन्थे उपनिबबन्धु। तदेवम् उपपत्तिरपि शङ्ककां तात्पर्यस्य निराकुर्वती तात्पर्यलिङ्गम्। इशावास्योपनिषदि विद्यमानेषु केषुचिन्मन्त्रेषु उपपत्ति: प्रमाणेन निरूप्यते। तद्यथा मन्त्र: -

**अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत्।**
**तद्भावतोऽन्यानत्येति तिष्ठत्तस्मिन्नयो मातरिश्वा दधाति।।**

इति मन्त्रे 'तस्मिन्नपो मातरिश्वा दधाति" इत्युपपत्तिर्दशिता। तद्यथा हि मन्त्रे स्वयमचलशीलोऽपि सोऽयमात्मा मनसोऽप्यतिशयवेगवान् वर्तिवर्त्ति, तमेवैमानीनद्रियाणि नाप्नुवन् पूर्वम्। तस्मिन् धावमानेऽऽत्मनि नेन्द्रियाणि मनो वा तमतिक्रम्य गतानि। यतोहि सर्वेषामपि भूतजातस्य कारणत्वात्। आत्मनि सति अस्तित्वे हेतुत्वे एव मातरिश्वा सर्वजन्तुजातस्य प्राणधारणमत्वं ददाति।

अत्रात्महेतुत्वे मातरिश्वानो: गमनं श्वयनं सम्भवति। मातरिश्वा नाम वायु: सर्वप्राणभृत् क्रियात्मको भवति। यदाश्रयाणि च कार्यकरणजातानि शरीरेन्द्रियाणि यस्मिन्नोतानि प्रोतानि, यश्च सूत्रसंज्ञको सर्वस्य जगत: जगत: कर्माणि चेष्टारूपाणि नाम दहनप्रकाशनाभिवर्षणादिलक्षणानि विधातृत्वेन विदधाति। यथा च श्रुति: -

भीषाद्वा वात: पवत" तस्मात् आत्मन: सत्वात् एव वात: पवते चलनादिकर्मवान् भवति। पुनरपि - 'यदिदं किञ्च जगत्सर्वं प्राण एजति नि:सृतम्। महद्भयं वज्रामुद्यतं य एतद्विदुरमृतास्ते भवन्ति।" यदेतत् ब्रहम तदाश्रित्य हि वायु प्राणापानव्यानोदानसमानादिभावेन जन्तूनां शरीरं गत्वा तेषां चलनादिकर्मणे सहकरोति, येन च तेषां 'प्राणी" ति सज्ञा अभिधानं वा सम्भवति। स च वायु: प्राणो वात्मस्वरूपसत्त्वे एव तथाभूत सर्वत्र प्रचरणकर्मत्त्वं वहतीति भाव:। पुनरपि श्रुत्येन्तरे अस्य एव आत्मन: सर्वाधिष्ठातृत्वं श्रुयते। यथा-

**भयादग्निस्तपति भयात्तपति सूर्य:।**
**भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चम:।**

एवंभूतात्मतत्त्वं संजानानां विदुषां अमृतत्वमिति श्रुत्या सम्प्रतिपन्नोऽर्थ: सौकार्य:। तस्यात्मन: भीषणाद्वायु पवते, तस्यैव भीत्याग्निश्च तपति, तथा च कालादिकृत्सूर्योऽपि तपति, भीत्यात्मन: एवमेव इन्द्रश्च, कर्मकृद्भवति। तथा च भीत्या च मृत्युर्धावति गन्तुक्षम: भवति पञ्चम:। एवमेवात्र देवानामपि आत्मातिरिक्तं सामर्थ्यं नास्ति इत्येव सूच्यते उपपत्तिद्वारेण। तथा च पञ्चदेवानां प्रथमादिगणनया फञ्चसंख्यकानाम् इन्द्रादि देवानां आत्मनि सत्त्वे तेषां चलनं सम्भवति इत्यवबोधयितुम् इवं श्रुति:।

अत्र प्रकृते अनेजदेकमित्यत्र तस्मिन्नपो मातरिश्वा दधाति इत्युक्त्वौ वायो:विभुत्वं सर्वव्यापियत्वञ्चात्मना चैतन्यशक्त्योभिप्रेरितं। न तु चैतन्यमन्तरेण तस्य वायो: किञ्चित्करणं सम्भवति। तस्यैव प्रेरणया वाय्वाग्नियमादीनामपि सामर्थ्यम्। तत्रोच्यते –

**तस्मिन्तिष्ठति पूर्णेऽस्मिन् परे ब्रहमणि केवले।**
**अप: कर्माणि सर्वाणि मातरीश्वा दधाति च।।**

तदब्रहम तिव्यापकत्वेन सर्वन्नस्थितिमत्सद्भावतो द्रुतं गच्छतोऽन्यान् कालवाय्वादीनत्येति अतिक्रम्य गच्छति इव तेषां गत्याप्राप्यमेव। तद्यथा हि श्रुति: -

**असीनो दूरं व्रजति शयानो यातिसर्वत:।**
**कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति।।**

मातरिश्वा देहन्तर्गतो वायुस्तस्मिन् देहान्तर्विद्यमाने सत्यप: आप्यन्ते प्राणादिसंज्ञा इत्युक्तमेव पुरस्तात्। प्राणापानोव्यानोदानसमाना: पञ्चप्राणा: देहान्त: वर्त्तिन: इति ख्याता। तेषां प्राणीशरीरस्थानान्यपि संसूच्यन्ते –

**हृदि प्राणो गुद्यपानो समानो नाभिमण्डले।**
**उदान: कण्ठदेशस्थो व्यान: सर्वशरीरग:।।**

अत्र 'अन प्राणन"े इत्यस्माद्धातो: विप्रापोत्समादिभिरूपसर्गै: धातो परे 'अन" प्रत्यये कृते प्राणादिशब्दानां निष्पत्ति:। एवमेव वायो: प्रानादिसंज्ञकै: शरीरान्त: वर्त्तित्वं सिध्यति।

मुखनासिकाभ्यां निष्क्रमणप्रवेशनात्प्राण: इति। मलादीनाम् अधोनयनादपान: इति। आहारेषु पाकार्थं वह्ने: समुन्नयनात् समान: इति। ऊर्ध्वनयनाद् उदान: इति। नाडेषु नाडे मुखेषु वितनानाद् व्यानश्चेति संज्ञा: वायो:।

तत्रान्तर्यामिणि सति वायु: सूत्रात्मा तपनवारिदादीनां कर्माणि वर्षनकर्माणि करोति। वायुना हि गौतमसूत्रेणायं लोक: परश्च लोक: सर्वाणि च भूतानि संदृब्धानि भवन्ति। इति श्रुते: क्रियाशक्तिमत्त्वात् दधाति विभज्यधारयति। अन्तर्यामितया तस्यैव सर्वेशत्वाद् अन्तर्यामिब्रह्मणे सर्वान्तर्यामितत्वेन 'य पृथिव्यां तिष्ठन्त्या" दिना तस्यैव सर्वनियामकत्व उक्ते 'भीहाऽस्माद्वात: पवते" इत्यादिश्रुतेश्च स वा एषोऽऽत्मा सर्वस्य वशी सर्वस्येशान् सर्वस्याधिपति: सर्वमिदं प्रशास्ति।

किञ्चात्र स सेतुविधरण एषां लोकानामस्तंभेदायेति उक्तत्वाद् अचिन्त्यमव्यपदेश्यं षड्भावविकाररहितं सर्वदैकरूपं सर्वान्तर्यामि सर्वचातकं सयुक्तिकं निरूपितम्।

केनोपनिषत्प्रथमखण्डे तृतीयमन्त्रे 'न तत्र चक्षुर्गच्छति" इत्यत्र 'यथैतदनुशिष्यादन्यदेव तद्विदितादधो अविदितादधि" इत्यस्मिन् अंशे उपपत्तिर्दृश्यते।

'न तत्र चक्षुर्गच्छति" इत्यत्र चक्षुष: रूपग्राहित्वे सति वर्णाकारभेदग्राहकत्वं विद्यते। चक्षुष: य विषय: रूपम् इति तच्च आत्मनि् नास्ति नीरूपत्त्वात्। 'श्रोत्रेणापि" विषयीकर्त्तु न शक्यते एषीऽऽत्मा। यतो हि श्रोतस्य विषय: शब्द:, 'अशब्दसस्पर्शमरूपमव्ययम्" इति श्रुते: श्रोत्रमपि विषयीकर्त्तुं न शक्यते तथा च 'वाचापि अभिव्यक्तिपरको न, यतोहि वाच: विषयोऽपि शब्द: सर्वोऽपि शब्देन खलु वाग्व्यवहारं कुरुते। एवम् एव वाचा सर्वमपि प्रकटयितुं शक्यम्। सुखदु:खेच्छाकुशलतादयो: व्यवहारा: क्रियमाणा: वाचा एव अभिव्यज्यन्ते। परं अवाङ्मानसगोचरं कुत: वा वाचा मनसाप्याप्तुं शक्यते। सुखदु:खादिभावरात्यात् न स मनसाप्याख्यातुं अशक्य: इति निरसनात्।

कथंनु तर्हि आत्मन: स्वरूपात्मभूतस्य चैतन्यस्य शिष्यायउपदेश; विधातव्य: इति शङ्का नितराम् उत्पद्येत। तामेव युक्तिं पुरस्कृत्याचार्येण उच्यते – 'तद्विदितादथो अविदितादधि" नाम विज्ञातवताम् अथो इत्युक्ते भिन्न: एव स:, अविदितवतां उपरि वर्त्तमान: सोऽयमात्मा वरीवत्र्ती।

कठोपनिषदि उपपत्ति:

कठोपनिषदि प्रथमाध्याये द्वितीयवल्यां श्रवणायापि बहुभि: रिति य: मन्त्र: वर्त्तते स एवोपपत्तिसूचक: इति निरूप्यते।

**श्रवणायापि बहुभिर्यो न लभ्य:.**
**शृण्वन्तोऽपि बहवो यं न विधु:।**
**आश्चर्यो वक्ता कुशलोऽस्य लब्ध्वाऽऽ-**
**श्चर्या जाता कुशलानुशिष्ट:।।**

श्रवणाय श्रोतुमपि यो न लभ्य: स आत्मा। अनेकै: बहुभि: श्रवणादिभि: न लभ्य: इतरबोधज्ञानेन स्वस्येच्छसम्बलरहितेन। 'श्रवणस्य दृष्टफलत्वानिर्विशेषस्य निर्विषयस्य च साक्षात्कारजनकत्वात् जनितस्यापि प्रतिभाप्रत्ययवद्भान्तित्वाद् आत्माऽविषय: एवैष्टव्य" इति च सामर्थ्यात् शृण्वन्तोऽपि नैके तं विद्यु: जानन्ति:।

संस्काररहितत्यस्वान्त: कथं तमेवात्मानं विद्युरित्याह भगवत्पादै: -
'अभागिनोऽसंस्कृतात्मानो न विजानीयु:" इति। तत्र किलाहाचार्य:शास्त्राचार्यवाक्यै: समोहितं संस्कृतं मन एव ब्रह्मसाक्षात्कारे कारणमिति। नात्वितरधा इति बोधयितुं कथमसंस्कृतान्त: करणसहकृतात्मनोऽविद्वांस: आत्मानं विजानीयु:।

तत्र वक्ता श्रोत्रापि दुर्लभ इति उक्तत्वाच्च। तथा श्रुत्वाप्यस्य आत्मनः कुशलः निपुणः एवानेकेषु लब्धा वेत्ता परिज्ञाता वा कश्चिदेव भवति। यस्मादाश्चर्या ज्ञाता कश्चिदेव कुशलानुशिष्टः कुशलेन निपुणेन आचार्येणानुशिष्ट इत्युक्तम्।

**आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्याः।**
**आश्चर्यवच्चैकमन्य शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्।।**

इत्युक्तादिशा कश्चिदेवाचार्यापसृत्या एकान्तमनस्को भूत्वा संगृहीतवाङ्मनोव्यापारः एनं विजानाति इत्यर्थतो दुर्बोद एवात्मा इति सिद्धम्।

सन्दर्भग्रन्थसूची


१. छान्दोग्योपनिषद् – शाङ्करभाष्यम्- गीताप्रेस गोरखपुर- २००१
२. ब्रह्मसूत्रशाङ्करभाष्यम्- भामतीटीकोपेता चौखम्बा संस्कृत प्रकाशन वाराणसी
३. काठकोपनिषद्भाष्यम् – आनन्दाश्रम मुद्रणालय पुणे- १९२२
४. बृहदारण्यकोपनिषद् - शाङ्करभाष्यम्- गीताप्रेस गोरखपुर
५. ब्रह्मसिद्धिः - चौखम्बा संस्कृत प्रकाशन वाराणसी
६. ईशाचास्यभाष्यम् – उराटाचार्यकृतम् - आनन्दाश्रम मुद्रणालय पुणे- १९२२
७. माण्डुक्योपनिषद्- श्रीगौडपादकारिकोपेता- आनन्दाश्रम मुद्रणालय पुण-१९३६
८. योगसूत्रम् – महर्षिपतञ्जलिप्रणीतम् – वलदेव मिश्र टिका - चौखम्बा संस्कृत प्रकाशन वाराणसी
९. सिद्धान्तविन्दुः - (दशश्लोकी)- राष्ट्रिय संस्कृत संश्थान मनित विश्वविद्यालय जनकपुरी नवदेहली